# ॥ श्रीशङ्कर गुरुनाथपञ्चरत्नम् ॥

कवेरजातटे स्थितं गुरोः कुले प्रतिष्ठितम्
अभीप्सितार्थदायकं चतुर्मठप्रवर्तकम् ।
प्रमुख्यशिष्यसंवृतं परात्मतत्त्वबोधकम्
प्रजाधिपाभिवन्दितं भजेऽहमात्मतुष्टये ॥१ ॥

मनःस्थमोहमोचकं मनोविनोददायकम्
नमस्कृतां प्रसादकं नमामि तं गुरुं परम् ।
निरस्तभेदवादकं विशुद्धतत्त्वबोधकम्
भवादिबन्धभेदकं समाश्रये निरन्तरम् ॥२ ॥

प्रशान्तचित्तसंयुतं सुशान्तकान्तविग्रहम्
स्वमातृचित्ततोषकं समस्तलोकरक्षकम् ।
अशेषशास्त्रपारगं समाश्रितान्तिमाश्रमम्
नमामि शङ्करं गुरुं स्वपात्रपूरितापगम् ॥३ ॥

सुरापगासमीपगं गिरीशपादपूजकम्
सुभाष्यदीपदीपकं नमामि तं हि देशिकम् ।

कुकर्ममार्गखण्डकं प्रचण्डधीविमण्डितम्
जिताखिलारिसञ्चयं धरावतीर्णमीश्वरम् ॥४ ॥

शिवङ्करं कृपाकरं गुरोः परम्परागतम्
मुदा युतं सदाशिवं सरागलोकदुर्लभम् ।
भवावताररूपिणं भवार्तबोधदायकम्
भवाब्धिदुःखभञ्जनं भजामि भक्तिपूर्वकम् ॥५ ॥

गुरोरिदं च पञ्चकं प्रपञ्चपङ्कशोषकम्
पठन्ति ये प्रदोषके प्रकृष्टचित्तहर्षदम् ।
इहापि सर्वसंपदं परत्र चापवर्गकम्
गुरोरपाङ्गपात्रतामवाप्नुवन्ति तेऽचिरात् ॥६ ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]